## अध्याय :-३८ Chapter-38

नारद उवाच ।।[१]

भूमेर्योजन लक्षे च कौरव्य रविमंडलम् ।।
योजनानां सहस्त्राणि भास्करस्य रथो[२] नव[३] ।। १

ईषादंडस्तथैवास्य द्विगुणः परिकीर्तितः ।।
सार्धकोटिस्तथा सप्त नियुतानि विवस्वतः ।। २

योजनानां तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् ।।
त्रिनाभि तच्च पंचारं पञ्चनेमि परिकीर्तितम् ।। ३

चत्वारिंशत्सहस्त्राणि द्वितीयोऽक्षोऽपि विस्तृतः ।।
पंच चान्यानि सार्द्धानि स्यन्दनस्य तु पांडव ।। ४

अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः ।।
ह्रस्वोऽक्षस्तद्युगार्द्ध च ध्रुवाधारं रथस्य वै ।। ५

द्वितीयोऽक्षस्तथा सव्ये चक्रं तन्मानसे स्थितम् ।।
हयाश्च सप्त च्छंदांसि तेषां नामानि मे शृणु ।। ६

गायत्री च बृहत्युष्णिग्जगती त्रिष्टुवेव च ।।
अनुष्टप्पंक्तिरित्युक्तारछंदांसि हरयो रवेः ।। ७

---

१ ब. श्री नारद उ० ।।
२ ब. रथे
३ ब. च

नैवास्तमनर्कस्य नोदयः सर्वदा सतः ।।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ।। ८

शक्रादीनां पुरे तिष्ठन्स्पृशत्येष पुरत्रयम् ।।
विकीर्णौ/तौ विकर्णस्थ स्त्रिकोणार्धपुरे तथा ।। ९

अयनस्योत्तरस्यादौ मकरं याति भास्करः ।।
ततः कुम्भं च मीन च राशे राश्यंतरं तथा ।। १०

त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् ।।
प्रयाति सविता कुर्वन्नहोरात्रं च तत्समम् ।। ११

ततो रात्रिः क्षयं याति वर्धते तु दिनं दिनम् ।।
ततश्च मिथुनस्याति परां काष्ठामुपागतः ।। १२

राशिं कर्कटकं प्राप्य कुरुते दक्षिणायां नम्ः[1] ।।
कुलाल चक्र पर्यंतो यथा शीघ्रं निर्वर्तते ।। १३

दक्षिणायक्रमे सूर्यस्तथा शीघ्रं निवर्तते ।।
अतिवेगितया कालं वायुमार्ग बलाच्चरन् ।। १४

---

१ अ॰ नमः

तस्मात्प्रकृष्टां भूमिं स कालेनाल्पेन गच्छति ।।
कुलाल चक्र मध्यस्थो यथा मंदं प्रसर्पति ।। १५

[1]तथोदगयने सूर्यः सर्पति मंद विक्रमः ।।
तस्मादीर्घेण कालेन भूमिमल्पं[2] [3]निगच्छति ।। १६

संध्याकाले च मंदेहाः सूर्यमिच्छंति खादितुम् ।।
प्रजापतिकृतः शापस्तेषां फाल्गुन रक्षसाम् ।। १७

अक्षयत्वं शरीराणां मरणं च दिने दिने ।।
ततः सूर्यस्य तैर्युद्धं भवत्यत्यं तदारुणम् ।। १८

ततो [4]गायत्रिपूतं यदिव्रजास्तोयं क्षिपंति च ।।
तेन दह्यंति ते पापाः संध्योपासनतः सदा ।। १९

ये संध्यां नाप्युपासंते कृतघ्ना यांति रौरवम् ।।
प्रतिमासं पृथक्सूर्य ऋषि गन्धर्वराक्षसैः ।। २०

अप्सरोग्रामणी सर्परथो याति च सप्तभिः ।।
धातार्यमा मित्र वरुणो विवस्वानिन्द्र एव च ।। २१

---

१ ब. तथ,
२ ब. माल्पं
३ ब. नगच्छिति
४ ब. गायत्रि

पूषा च सविता सो थ भगस्त्वष्टा च कीर्तितः ।।
विष्णुश्चैत्रादिमासेषु आदित्या द्वादश स्मृताः ।। २२

ततो दिवाकरस्थानान्मंडलं शशिनः स्थितम् ।।
लक्षमात्रेण तस्यापि त्रिचक्रो रथ उच्यते ।। २३

कुंदाभा दश चैवाश्वा वामदक्षिणतो युताः ।।
पूर्णे शतसहस्रे च योजनानां निशाकरात् ।। २४

नक्षत्र[1] मंडले कृत्स्नमुपरिष्टात्प्रकाशते ।।
चतुर्दश चार्बुदान्यप्य शीतिः सरितांपतिः ।। २५

विंशतिश्च तथा कोटयो नक्षत्राणां प्रकीर्तिताः ।।
द्वे लक्षे चोतरे तस्माद्बुधो नक्षत्रमण्डलात् ।। २६

वाप्यग्निद्रव्य संभूतो रथश्चंद्र सुतस्य च ।।
पिंशगैस्तुरगैर्युक्तः सोष्टाभिर्वायुवेगभिः ।। २७

द्विलक्षश्चोत्तरे तस्माद्बुधाच्चाप्युशना स्मृतः ।।
शुक्रस्यापि रथोष्टाभिर्युक्तो भूत्संभवैर्ह यैः ।। २८

---

१ ब. ~~नक्ष~~ नाक्षत्र

लक्षद्वयेन [1]भौमस्य स्मृतो देवपुरोहितः ।।
अष्टाभिः[2] पांडुरैरश्वैर्युक्तोऽस्य कांचनो रथः ।। २९

सौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे समुपस्थितः ।।
आकाशसंभवैरश्वैरष्टाभिः शबलै रथः ।। ३०

स्वर्भानोस्तुरगाश्चाष्टौ भृगाभाधूसरा रथम् ।।
वहंति च सकृद्युक्ता आदित्याधः स्थितास्तथा ।। ३१

सौरेर्लक्षं स्मृतं चोर्ध्वं ततः सप्तर्षि मण्डलम् ।।
ऋषिभ्यश्चापि लक्षेण ध्रुवश्चोर्ध्वं व्यवीस्थतः ।। ३२

मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः ।।
ध्रुवोऽपि शिंशुमारस्य पुच्छाधारे व्यवस्थितः ।। ३३

यमाहुर्वासुदेवस्य रूपमात्मानमव्ययम् ।।
वायुपाशैर्ध्रुवे बद्धं सर्वमेतच्च फाल्गुन ।। ३४

नवयोजनं साहस्त्रं मण्डलं सवितुः स्मृतम् ।।
द्विगुणं[3] सूर्यविस्तारान्मण्डलं शशिनः स्मृतम्[4] ।। ३५

---

१ ब. भौमस्य
२ ब. भि
३ ब. द्विगुणः
४ ब. स्मृतः

तुल्यस्तयोस्तु स्वभानुर्भूत्वाधस्तात्प्रसर्पति ।।
उद्धृत्य पृथ्वीच्छायां निर्मलां मण्डलाकृतिः ।। ३६

चन्द्रस्य षोडशो भागो भार्गवश्च विधीयते ।।
भार्गवात्पादहीनस्तु विज्ञेयो॑ऽथ बृहस्पतिः ।। ३७

बृहस्पतेः पादहीनो वक्रसौरी बुधस्तया ।।
शतानि पंच चत्वारित्रीणि द्वे चैक योजनम् ।। ३८

योजनार्धप्रमाणानि भानि ह्रस्वं न विद्यते ।।
भूमि सूर्यांतरं तच्च भुवर्लोकः प्रकीर्तितः ।। ३९

भूमि लोकश्च भूर्लोकः भुवर्लोकः पादगम्यः प्रकीर्तितः ।।
ध्रुवसूर्यांतरं तच्च नियुतानि चतुर्दश ।। ४०

स्वर्लोकः सोऽपि गदितो लोकसंस्थान चिंतकैः ।।
ध्रुवादूर्ध्वं तथा कोटिर्महलोकः प्रकीर्तितः ।। ४१

द्वे कोटयो[1] च जनो यत्र निवसंति चतुः[2]सना ।।
चतुर्भिश्चापि कोटीभिस्तपोलकस्ततः स्मृतः ।। ४२

---

१ ब. कोटयो
२ ब. सनाः

वैराजा यत्र ते देवाः स्थिता दाह विवर्जिताः[1] ।।
षड्गुणेन[2] तपोलोकत्सत्यलोको विराजते ।। ४३

अनुपर्मरका यत्र ब्रह्मलोको हि स स्मृतः ।।
अष्टादश तथा कोटयो लक्षाण्यशीति पंच च ।। ४४

शुभं निरूपमं स्थानं तदूर्ध्वं संप्रकाशते ।।
भूर्भुवः स्वरिति प्रोक्तं त्रैलोक्यं कृतकं त्विदम् ।। ४५

जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् ।।
कृतकाकृतयोर्मध्ये महर्लोक इति स्मृतः ।। ४६

शून्यो भवति कल्पांते योत्यंतं न विनश्यति ।।
एते सप्त समाख्याता लोकाः[3] पुण्यैरुपार्जिताः[4] ।। ४७

यज्ञैदनिर्जपैर्होमैि स्तीर्थैर्व्रत समुच्चयैः ।।
वेदादिप्रोक्तैरन्यैश्च साध्यांल्लोकानिमान्विदुः ।। ४८

ततश्चण्डस्य शिरसो धारा नीरमयी शिवा ।।
सर्वलोकान्समापाल्व्य गंगा मेरावुपागता ।। ४९

---

१ ब. विवर्जितः
२ ब. षड् गुणेन
३ ब. का
४ ब. तः

ततो महीतलं सर्वं पातालं प्रविवेश सा ।।
अंडमूर्ध्नि स्थिता देवी सततं द्वारवासिनी ।। ५०

देवीनां कोटि कोटीभिः संवृता पिंगलेन च ।।
तत्र स्थिता सदा रक्षां कुरुते ऽण्डस्य सा शुभा ।। ५१

निहंति दुष्ट संघातान्महाबल पराक्रमा ।।
वायुस्कंधानि सप्तापि श्रृणु यद्वत्स्थितान्यपि ।। ५२

पृथिवीं समभिक्रम्य संस्थितो मेघमंडले ।।
प्रवहोनाम यो मेघान्प्रवहत्यति शक्तिमान् ।। ५३

धूमजाश्चोष्मजा मेघाः सामुद्रैर्येन पूरिताः ।।
तो ये भवंति नीलांगा [1]वर्षिष्ठाश्चैव भारत ।। ५४

द्वितीयश्चावहो नाम निबद्धाः सूर्यमंडले ।।
तेन बद्धं ध्रुवेणादं भ्राम्यते सूर्यमंडलम् ।। ५५

तृतीयश्चोद्वहो नाम चंद्रस्कंदे प्रतिष्ठितः ।।
बद्धं ध्रुवेण येनदं भ्राम्यते चंद्र मंडलम् ।। ५६

---

१ ब॰ वार्षिष्ठा...

चतुर्थः[१] संवहो नाम स्थितो नक्षत्र मंडले ।।
वातरश्मि भिराबद्धं ध्रुवेण सह भ्राम्यते ।। ५७

ग्रहेषु पंचमः सोऽपि विवहोनाम मारुतः ।।
ग्रहचक्रमिदं येन भ्राम्यते ध्रुव संधितम् ।। ५८

षष्ठः परिवहो नाम स्थितः सप्तर्षि मंडले ।।
भ्रमंति ध्रुवसंबद्धा येन सप्तर्षयो दिवि ।। ५९
सप्तमश्च ध्रुवे बद्धो वायुर्नाम्ना परावहः ।।
येन संस्थापितं ध्रौव्यं चक्रं चान्यानि भारत ।। ६०

यं समासाद्य वेगेन दिशामंतं[२] प्रपेदिरे ।।
दक्षस्य दश पुत्राणां सहस्त्राणि प्रजापते[३] ।। ६१

एवमेते दितेः पुत्राः सप्तसप्त व्यवस्थिताः ।।
अनारमंतः संवांति सर्वगाः सर्वधारिणः ।। ६२

ध्रुवादूर्ध्वम सूर्यं चाप्यनक्षत्रम तारकम् ।।
स्वतेजसा स्वशक्त्या चाधिष्ठितास्ते हि नित्यदा ।। ६३

इत्यूर्ध्वं ते समाख्यातं पातालान्यथ मे[४] श्रृणु ।। ६४
*५ इति श्री स्कांदे......कुमारिकाख्याने लोक व्यवस्थिति वर्णनं नामाष्ट-
-त्रिंशोऽध्यायः ।।

---

१ ब. र्थ  २ ब. मतः  ३ ब. ....पतेः
४ ब. "सं" पाठः
*५ ब. इति श्री स्कंदपुराणे कुमारिकाखंडे ऊर्ध्व व्यवस्थिति सप्तत्रिंशोऽध्यायः ।।
Actually it is 38 th Chapter.